ॐ

॥ अर्हम् ॥

# जैनमुक्तावली

# सूरिस्तवशतकं च,

प्रणेता,

मुनिनन्दनविजयः

तपोगच्छाधिपति--शासनसम्राट्--आचार्यमहाराजाधिराज -



श्रीमद्—विजयनेमिसूरीश्वरजी.

॥ अर्हम् ॥

॥ सकलस्वपरसमयपारावारपारीणसुविहितश्री--
भगवत्यादिनिखिलयोगोद्वहनसूरिमन्त्रसमा-
राधनविशुद्धशीलानुष्ठानप्रौढप्रभावशा--
लितपोगच्छनभोनभोमणिभट्टारका
चार्यश्रीमद्विजयनेमिसूरि
भगवद्भ्यो नमः ॥

# ॥ श्री जैनमुक्तावली ॥

प्रणेता,

मुनि नन्दनविजयः

प्रत, ५००. सने १९२३ प्रथमावृत्तिः

राजनगर ( अमदावाद ) वास्तव्य प्राग्वाटवणिग्वंशावतंसधर्मकर्म-
कर्मठश्रेष्ठिप्रवर मनसुखभाइ सुत माणेकलालभाइ श्रेष्ठिप्र-
वरेण ग्रन्थोऽयं राजनगर ( अमदावाद घीकांटा शेठ
जेशंगभाइनी वाडी अन्तर्गत )
जैन एडवोकेट प्रीन्टींग प्रेस इत्याख्ये मुद्रणालये शा चीमनलाल
गोकलदासद्वारा सम्मुद्रय प्रकाशितः,

॥ अर्हम् ॥

। श्री परमात्मने नमः ॥

॥ श्री गौतमस्वामिने नमः ॥

॥ आचार्य श्रीविजयनेमिसूरिभगवद्भ्यो नमः ॥

# ॥ श्री जैनमुक्तावली ॥

प्रणमामि महावीरं, चरमं तीर्थनायकम् ।
सच्चिदानन्दसम्पूर्णं, भव्याभीष्टार्थदायकम् ॥ १ ॥

वन्दे श्रीगौतमं देवं, देवतासङ्घसेवितम् ।
निःशेषलब्धिसम्पन्नं, प्रथमं गणनायकम् ॥ २ ॥

श्रीमच्छ्रमणसङ्घस्या-धीश्वर योगशालिनम् ।
परमप्रौढसाम्राज्यं. नेमिसूरिं प्रणौमि तम् ॥ ३ ॥

सूरेर्भगवतस्तस्य, पादसेवानुभावतः ।
"जैनमुक्तावली" काचिद्, विधियाऽपि विरच्यते॥४॥

द्रव्यपर्यायभेदेना-नेकभेदसमन्वितौ ।
सत्पदार्थौ समाख्यातौ, कृत्स्नभावप्रकाशिभिः ॥५॥
धर्माधर्मनभो जीव-पुद्गलानेहसस्तथा ।
द्रव्याणि गुणपर्याय-वत्त्वं तत्त्वमुदाहृतम् ॥ ६ ॥
गत्युपकारकोऽसङ्ख्य-प्रदेशोऽरूपिनिष्क्रियः ।
एकद्रव्यं समाख्यातो, धर्मो धर्मोपदर्शिभिः ॥ ७ ॥
तथैवाधर्म आदिष्टः, परं स्थित्युपकारकः ।
अवगाहद आकाशो- वस्तुनामवगाहिनाम् ॥८॥
अनन्तोऽयं प्रदेशैश्च, लोकालोकविभागभाक् ।
तदसङ्ख्येयभागादि-ष्वात्मनामवगाहना ॥ ९ ॥
आसमस्तलोकात् सा-ऽजीवानान्त्ववगाहना ।
मूर्त्तामूर्त्तप्रभेदेन, द्विविधाप्यावगाहना ॥ १० ॥
एकप्रदेशमुख्येष्व-प्युक्तान्या तत्र सर्वतः ।
प्रदेशानां हि संहार-विसर्गौ स्तः प्रदीपवत् ॥ ११॥

एवं जीवोऽपि विज्ञेयो, विशेषस्तूपदर्श्यते ।
अविभुः सक्रियश्चाथा-नेकद्रव्यं वपुर्मितः ॥ १२ ॥
चिह्नं चास्योपयोगः स, साकारेतरभेदतः ।
द्विविधः स यथासङ्ख्यं, पुनश्चाष्टचतुर्विधः ॥ १३ ॥
मतिश्रुतावधिमनः-- पर्यवकेवलानि हि ।
मत्यज्ञानं श्रुताज्ञानं, विभङ्गज्ञानमेव च ॥ १४ ॥
इत्यष्टधा चतुर्धा च, श्रूयतामत्र कथ्यते ।
चक्षुरचक्षुरवधि-केवलदर्शनं तथा ॥ १५ ॥
मतिश्चतुर्विधोक्ताव-ग्रहेहापायधारणाः ।
तत्र चावग्रहो द्वैधं, व्यञ्जनार्थप्रभेदतः ॥ १६ ॥
ईहाप्रभृतयस्तु स्यु-र्ह्यर्थस्यैवाद्यवग्रहः ।
स्पर्शजिह्वाघ्राणकर्ण-प्रभेदेन चतुर्विधः ॥ १७ ॥
चक्षुर्मनोविधाधिक्यात्, षोढाथ वग्रहादयः ।
द्वादशधा पुनः सर्वे, प्रत्येकं परिकीर्त्तिताः ॥ १८ ॥

वहुबहुविधक्षिप्रा- निश्रितनिश्चितध्रुवाः ।
सेतरा इति षट्त्रिशंतु- त्रिशतप्रभिदा मतिः ॥१९॥

मतिपूर्वं श्रुतं द्वैध-मङ्गबाङ्गप्रविष्टकम् ।
अनेकभेदं तत्राद्यं, ज्ञेयं सामायिकादिकम् ॥ २०॥

अङ्गप्रविष्टमाचारा-ङ्गादि द्वादशधा मतम् ।
द्विधावधिर्भवहेतुः, क्षयोपशमहेतुकः ॥ २१ ॥

द्वितीयस्तत्र विज्ञेयः, षड्विकल्पसमन्वितः ।
आनुगामिवर्द्धमाना-वस्थितेतरभेदतः ॥ २२ ॥

मनः पर्यायकं नाम, ज्ञानं द्विविधमिष्यते ।
ऋजुमतिर्विपुलधीः, केवलं केवलं मतम् ॥२३॥

प्रमाणं च तदेव स्यात्, स्वपरव्यवसायकम् ।
व्यवसायस्वभावं तत्, पण्डितैः परिकीर्तितम् ॥२४॥

यतस्तस्यास्ति प्रामाण्यं, समारोपविरोधिता ।
समारोपोऽनस्मिंस्तद्-व्यवसायोऽधिगम्यताम् ॥२५॥

विपर्ययः संशयोऽन-ध्यवसाय इति त्रिधा ।
अधिज्ञेयः स तत्राद्यो, विपर्ययः प्रदर्श्यते ॥ २६ ॥
वि[illegible]तैककोटेः स्या-न्निष्टङ्कनं विपर्ययः ।
भवेद्यथा शुक्तिकायां, रजताकारतामतिः ॥ २७ ॥
तत्संशयोऽनवस्थिता-ऽनेककोट्यवलम्बि यत् ।
ज्ञानं साधकबाधक-प्रमाणानुपलम्भतः ॥२८॥
यथा स्थाणुरयं किं वा? भवेद्वा पुरुषश्च किम्? ।
अथानध्यवसायस्य, स्वरूपं किञ्चिदुच्यते ॥ २९ ॥
स विद्भिः समाख्यातः किमित्यालोचमात्रकम् ।
ज्ञानं यत्तद्यथा गच्छ- त्तृणस्पर्शस्य शेमुषी ॥३० ॥
तच्च द्विधाऽथ प्रत्यक्षं, परोक्ष तत्र चादिमम् ।
स्पष्टं तत्स्पष्टता तत्र, यद्विशेषप्रकाशनम् ॥ ३१ ॥
सांव्यवहारिकपार–मार्थिकत्वेन तद्द्विधा ।
सांव्यवहारिकं तत्रे-न्द्रियानिन्द्रियहेतुकम् ॥ ३२ ॥

इन्द्रियमिन्द्रलिङ्गं स्याद्-इन्द्रदृष्टं तथैव च ।
इन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रश्चात्मा प्रकीर्त्तितः ॥३३॥

तच्चोक्तं पञ्चधा स्पर्श-जिह्वाघ्राणाक्षिकर्णतः ।
द्विधा तद्द्रव्यभावाभ्यां, ते द्वेऽप्येवं द्विधा मते ॥३४॥

निर्वृत्तिरुपकरणं, द्रव्यतस्तत्र भाव्यताम् ।
लब्धिश्चाथोपयोगश्च, भावतः परिभावितम् ॥३५॥

स्पर्श-रस-गन्ध-वर्ण--शब्दा अनुक्रमादिमे ।
एतेषां विषया ज्ञेया-वक्ष्यन्तेऽधश्च तद्विधाः ॥३६॥

अनिन्द्रियं मनो द्वैधं, द्रव्यभावप्रकारतः ।
एतद्द्वयं भवेद्द्वेधा, मतिश्रुतविकल्पतः ॥ ३७ ॥

स्याच्छ्रुतानुसार्याद्य-मितरं चेतरं मतम् ।
अवग्रहादिका प्रोक्ता, चतुर्धैव मतिर्यतः ॥ ३८ ॥

ईहा स्यात् संशयाद्भिन्ना, संशयोत्तरभाविनी ।
क्रमश्चैष तथाहेतु-क्षयोपशमभावतः ॥ ३९ ॥

श्रुतज्ञानं समाख्यातं. चतुर्दशविधं जिनैः ।
अक्षरं संज्ञि सम्यक् च, सादिसान्तं तथा गमि ॥४०
एवमङ्गप्रविष्टं च, प्रतिपक्षान्वितं मतम् ।
सांव्यवहारिकं प्रोक्तं, मयैवं च यथामति ॥ ४१ ॥

पारमार्थिकमुत्पत्ता-वात्ममात्रसमाश्रितम् ।
विकलं सकलं चाद्य-मवधिर्मन आख्यकम् ॥४२॥
विशिष्टावृतिविच्छेदा-दवधी रूपिगोचरः ।
मनःपर्यायकं ज्ञानं, हृदयमात्रगोचरम् ॥ ४३ ॥
अनेकर्द्धिनिधानानां, शुद्धसंयमशालिनाम् ।
आपुष्कराद्धमाख्यातं, संज्ञिनां चित्तवेदकम् ॥४४॥
अवधिज्ञानमेवेद-माहुर्नव्या महाशयाः ।
सूत्रे भेदाभिधानं च, धर्मभेदाभिप्रायतः ॥ ४५ ॥
घातिकर्मक्षयोद्भूतं, सर्वभावप्रकाशकम् ।
केवलज्ञानमाख्यातं, सकलं सकलं सदा ॥ ४६ ॥

तद्वतो दोषमुक्तत्वा-दर्हत्त्वं प्रतिपादितम् ।
तस्माच्च तत्र नैवेष्टा क्षित्यादीनां तु कर्तृता ॥ ४७ ॥
जन्यत्वं च शरीरेणो-पाधिना समलङ्कृतम् ।
इति प्रत्यक्षमाख्यातं, परोक्षं चाथ कथ्यते ॥ ४८ ॥
तदस्पष्टं समाख्यातं, पञ्चधा पूर्वपण्डितैः ।
तत्प्रपञ्चोऽथ विज्ञेयो-वक्ष्यमाणो यथानयम् ॥ ४९ ॥
संस्कारबोधसम्भूत-मनुभूतार्थगोचरम् ॥
तदित्याकारकं ज्ञानं, स्मरण कथितं बुधैः ॥ ५० ॥
तिर्यगूर्ध्वत्वसामान्य-प्रभृत्यालम्बनं तथा ।
संकलनात्मकं ज्ञानं, प्रत्यभिज्ञानमिष्यते ॥ ५१ ॥
त्रिकालवर्तिनोर्यः स्यात्, साध्यसाधनयोः खलु ।
सम्बन्धादिस्तदालम्ब-मूहापरनामकम् ॥ ५२ ॥
उपलम्भेतरोद्भूतं, विज्ञान परिकीर्त्यते ॥
सत्येवास्मिन्निदं चेति, तर्कस्तार्किकशेखरैः ॥ ५३ ॥

अनुमानं द्विधा स्वार्थं, परार्थं चादिमं त्विदम् ।
हेतुग्रहणसम्बन्ध--स्मृतिहेतुकसाध्यवित् ॥ ५४ ॥
हेतुश्च निश्चितान्यथा-नुपपत्त्येकलक्षणः ।
अन्यथानुपपत्तिश्च साध्यधर्मेण गृह्यते ॥ ५५ ॥
अप्रतीतं च साध्यं स्या-दनिराकृतमीप्सितम् ।
विषयभागात् साध्यत्वं भिन्नं भिन्नमुदाहृतम् ॥ ५६ ॥
पक्षहेतुवचो रूपं, परार्थमुपचारतः ।
दृष्टान्ताद्यत्र नैवाङ्गं, वस्तुतो हेतुरेव च ॥ ५७ ॥
क्वचित्प्रयुज्यते नाम, दृष्टान्तादिरिहापि च ।
स्याद् दृष्टान्तोऽविनाभाव-प्रतिपत्तेः किलास्पदम् ५८
द्वेधोक्तोऽथ स साधर्म्य- वैधर्म्याभ्यां सुधीमुखैः ।
अन्तर्व्याप्तिर्बहिर्व्याप्ति-श्चेति व्याप्तिर्द्विधा मता ॥ ५९ ॥
उपनयो निगमनं, यथासङ्ख्यमथोच्यते ।
साध्यधर्मिणि यद्धेतोः, साध्यधर्मस्य वा पुनः ॥ ६० ॥

उपसंहरणं चैवं, तान्यवयवसंज्ञया ॥
पञ्चाप्यत्र प्रसिद्धानि, पण्डितानां प्रयोजने ॥ ६१ ॥
उपलब्ध्यनुपलब्धि-भेदाद्धेतुर्द्विधा मतः ।
विधिनिषेधयोरेतौ, क्रमात्सिद्धिनिबन्धने॥ ६२ ॥
सदंशोऽत्र विधिर्ज्ञेयः, प्रतिषेधोऽसदंशकः ।
चतुर्विधः सविज्ञाना--मुत्तमैः परिकीर्त्तितः ॥ ६३ ॥
पूर्वप्रध्वंसकान्योन्या-ऽत्यन्ताभावप्रकारतः ।
ज्ञेयः सोऽथोपलब्धिं च, प्रभेदेन प्रदर्श्यते ॥ ६४ ॥
अविरुद्धा विरुद्धा च तत्राद्याः षड्विधा मता ।
सा साध्येनाविरुद्धानां व्याप्यादीनां विभाविता ६५
सप्तधाऽन्या समाख्याता, स्वभावादिविरोधिनी ।
तथैवानुपलब्धिः स्याद्- द्विधाऽपि नवरं त्विदम् ६६
विरुद्धानुपलब्धिश्च, पञ्चभेदा विभाविता ।
इतरा सप्तधा ज्ञेया, क्रमाद्विधिनिषेधकृत् ॥६७॥

अभिधेयानि वस्तूनि, यो जानीते यथास्थिति ।
अभिधत्ते यथाज्ञानं, स आप्तोयं द्विधा मतः ॥६८॥

लौकिको जनकादिः स्या- ल्लोकोत्तरश्च तीर्थकृत् ।
तेषां ह्येव वचः शून्यं, विसंवादेन दृश्यते ॥ ६९ ॥

आविर्भूता च तद्वाचोऽ-थ संविन्मत आगमः ।
उपचाराद् भवेदाप्त-वचनं वक्ष्यतेऽथ तत् ॥ ७० ॥

आदिः पौद्गलिको वर्णा, वर्णानां निरपेक्षिका ।
अन्योऽन्यापेक्षकाणां च, पदं संहतिरुच्यते ॥७१॥

वाक्यं स्याच्च पदानां तु, वचनं तत्त्रयात्मकम् ।
सामर्थ्यमर्थशक्तिः स्यात्, सङ्केतः समयो मतः ७२

ताभ्यां स्वाभाविकाभ्यां स्या-च्छब्दोऽर्थस्य विबोधकृत्
अयं विधिनिषेधाभ्यां, लभते भङ्गसप्तकम् ॥७३ ॥

अनन्तत्वेऽपि धर्माणां, सप्तभङ्ग्येव यन्मता ।
तद्धि पर्यनुयोगानां, सप्तानामेव सम्भवात् ॥७४॥

सकलादेशरूपान्य-रूपाभ्यामुदिता द्विधा ।
कथ्यते विषयश्चाथ, परिच्छेद्यं च गोचरः ॥७५॥

अनेकान्तात्मक वस्तु, सामान्येतरमुख्यकम् ।
तद्गोचरश्च तद्द्वेधा, तिर्यगूर्ध्वत्वभेदतः ॥ ७६ ॥

विशेषोऽपि द्विधा प्रोक्तो गुणपर्यायभेदतः ।
सहभावी गुणो धर्मः, क्रमभावी तथाऽपरः ॥७७॥

फलं चाथ प्रमाणस्य, द्विविधं परिकीर्तितम् ।
अनन्तरफलं त्वाद्यं, परम्परफलं परम् ॥ ७८ ॥

फलमज्ञाननिवृत्तिः, सर्वेषामादिमं मतम् ।
आदानत्यजनोपेक्षा--बुद्धयश्चापरं फलम् ॥ ७९ ॥

केवलस्य तु विज्ञेय--मौदासीन्यं फलं परम् ॥
तत्स्याद्भिन्नमभिन्नं च, प्रमाणाच्च प्रमातृतः ॥८०॥

क्रिया क्रियावतो यस्माद्--भेदाभेदविभूषिता ।
कर्ता हि साधकः प्रोक्त--स्तन्निर्वर्त्या भवेत् क्रिया ८१

प्रमाणादिव्यवहृति- रियं स्यात्पारमार्थिकी ।
संवृत्या तदुरीकार्ये, स्वेष्टसिद्धिविरोधिता ॥ ८२ ॥

एवं प्रमाणमाख्यातं, स्वरूपादिचतुष्टयात् ।
विपरीतस्तदाभासो, विशेषस्तु प्रदर्श्यते ॥ ८३ ॥

पक्षाभासास्त्रयस्तत्र मध्यमोऽनेकभेदभृत् ।
प्रत्यक्षप्रमुखैर्यस्मात्, साध्यधर्मनिराकृतिः ॥८४॥

हेत्वाभासः परिज्ञेयो, भाषितो मुनिपुङ्गवैः ।
असिद्धश्च विरुद्धश्चा- नैकान्तिक इति त्रिधा॥८५॥

अप्रतीतस्वरुपः स्या- दसिद्धो द्विविधः स च ।
उभयासिद्ध आद्यश्चा- न्यतरासिद्धकोऽपरः ॥८६॥

साध्यविपर्ययव्यासो- विरुद्धः प्रथितो भुवि ।
अन्यथानुपपत्तेश्च, संदेहात्स्यात्तृतीयकः ॥ ८७ ॥

विपक्षवृत्तिसंदेह- निर्णयाभ्यां द्विधास्त्ययम् ।
चतुर्धा पञ्चधा चैव, हेत्वाभासो मतोऽपरैः॥ ८८ ॥

अकिञ्चित्करयोगेन, चतुर्धा यन्मतोऽपरैः ।
तन्नाप्रयोजकात्मा हि, पक्षाभासः स कीर्त्यते ८९

एवं सत्प्रतिपक्षश्च, बाधश्च नातिरिच्यते ।
असिद्धानतिरिक्तत्वा- दिति जैनमतं मतम् ॥९०॥

दृष्टान्ताभास आख्यातो- द्विविधो धौतकल्मषैः ।
एकैको नवधा चैव- माभासान्तरमूह्यताम् ॥९१॥

स्यात्प्रमाणैकदेशत्वाद्- भिन्नः प्रमाणतो नयः ।
द्रव्यार्थिको मतः पूर्वो-ऽन्यः पर्यायार्थिको बुधैः९२

नैगमश्च संग्रहश्च, व्यवहार इति त्रिधा ।
आद्योऽपरश्चतुर्धा स्यात्, प्रथम ऋजुसूत्रकः ॥९३॥

शब्दसमभिरूढौ स्या- देवम्भूतश्चतुर्थकः ।
एतेष्वर्थनयाः केचित्, केचित् शब्दप्रधानकाः॥९४

विपरीतो नयाभासः, फलादिकं च पूर्ववत् ।
शब्दार्थरचनारूपो- निक्षेपश्चाथ भाव्यते ॥ ९५ ॥

स नामस्थनाद्रव्य- भावभेदाच्च र्विधः ।
द्रव्यार्थिकनयस्य स्या- दिष्टं नामादिकत्रयम् ॥९६॥
पर्यायार्थिकयोगस्तु, भावस्यैव विभावितः ।
शुद्धत्वाद्भावमिच्छन्ति, शब्दादिका नयास्त्रयः॥९७
चत्वारः सर्वनिक्षेपा- निच्छन्तीति मतं परम् ।
एतैजीवादिका भावा, निरूप्यन्ते यथागमम् ९८
अथात्मा द्विविधः प्रोक्तो- मुक्तामुक्तविभागतः ।
मुक्तिः कर्मक्षयो ज्ञेयः, परमानन्द इत्युत ॥९९॥
मुक्ताः सिद्धा गताः पार, परम्परगताश्च ते ।
प्राक्प्रयोगादिना गत्वा, लोकाग्रस्थनसंस्थिताः१००
पूर्वदेहत्रिभागेन, मिताकाशावगाहनाः ।
तीर्थातीर्थप्रकारेण, द्विविधाः परिकीर्तिताः ॥१०१॥
सर्वकर्मविनिर्मुक्तः, कर्माष्टप्रभिदं मतम् ।
ज्ञानावरणमाद्यं स्या- द्दर्शनावरणं परम् ॥ १०२ ॥

वेद्यं च मोहनीयं चा- युष्क च नाम गोत्रकम् ।
विघ्नं चाष्टममाख्यातं, शुभाशुभमिति द्विधा ॥ १०३
कार्मणवर्गणाजात- मिदं पौद्गलिकं मतम् ।
औदादिकारिभेदेन, वर्गणाष्टविधा मता ॥ १०४ ॥

प्रकृत्यादिविधाभिश्च, चतुर्धा कर्म कीर्तितम् ।
मिथ्यात्वाविरतियोग- कषायाश्चेति बन्धकाः १०५

प्रकृत्यां च प्रदेशे च, कारणं योग आहितः ।
अनुभागे स्थितौ च स्यात्, कषायाः कारणं किल

यथासम्भवमेतेषा- मष्टधा करणं मतम् ।
एतेषामुदयादिः स्याद्, द्रव्यक्षेत्रादिभेदतः ॥ १०७

ज्ञानदर्शनचारित्र- प्रभृतिः स्याद् यथायथम् ।
क्षयोपशान्तिभावेन, चैतेषामेव कर्मणाम् ॥ १०८ ॥

चतुर्विधा अमुक्ताः स्यु- र्नारकादिप्रभेदतः ।
रत्नप्रभादिभेदेन, नारकाः सप्तधा मताः ॥ १०९ ॥

पञ्चाक्षा एव विज्ञेया· मुक्तश्च तिर्यक्शरीरिणः ।
एकन्द्रियादिभेदेन, तिर्यञ्चः पञ्चधा मताः ॥ ११० ॥

आद्याः पृथ्वीपयःतेजो- वरेण्युवनभेदतः ।
सूक्ष्माश्च बादराश्चैते, द्वीन्द्रयाद्या अनेकधा ॥ १११ ॥

गर्भजेतरभेदेन, द्विधा च मनुजा मताः ।
भुवनपत्यादिभेदेन, देवताश्च चतुर्विधाः ॥ ११२ ॥

पर्याप्तेतरभेदेना-ऽमी सर्वे द्विविधा मताः ।
पर्याप्तिरात्मनः शक्ति- विशेषः सा च षड्विधा ११३

सर्वेऽमी ससमुद्घाताः, सलेश्याश्च सयोगिनः ।
यथार्हस्थानिनः प्रोक्ताः, सर्वभावप्रदर्शिभिः ॥ ११४

वेदनादिसमुद्घाताः, सप्त शास्त्रे प्रकीर्तिताः ।
लेश्याः कृष्णा च नीला च, कापोता तैजसी तथा ११५

पद्मा शुक्ला च योगास्तु, त्रय एव प्रकीर्तिता ।
मनोयोगो वचोयोगः, सत्यादिकश्चतुर्विधः ॥ ११६ ॥

सप्तधा काययोगः स्यात्, काय औदारिकस्तथा ।
वैक्रियश्चाहारकश्च, तजसः कार्मणस्तथा ॥११७ ॥

तिर्यञ्चश्च मनुष्याश्च, ज्ञेया औदारिकाङ्गिनः ।
नारकाश्च सुरा लब्धि- मन्तो वैक्रियकायिनः ११८

वपुश्चाहारकं शुद्धं, स्याच्चतुर्दशपूर्विणाम् ॥
तैजसं कार्मणं च स्या- दाभवं सर्वदेहिनाम् ११९

रत्नप्रभादिपृथ्व्यः स्यात्, स्थानं नारकदेहिनाम् ।
विमानाद्यासिनो देवास्तिर्यञ्चः सर्वलोकगाः १२०

आपुष्करार्द्धमास्थानं मनुष्याणां मतं जिनैः ।
जम्बूद्वीपादयो द्वीपाः, समुद्रा लवणादयः ॥१२१ ॥

एवं च पुद्गला ज्ञेया- रूपिणः परिणामिनः ।
दशधा परिणामश्च, बन्धनादिप्रकारतः ॥ १२२ ॥

स्निग्धरुक्षप्रभेदेन, भावितं बन्धनं द्विधा ।
स्पृशन्तो चास्पृशन्तो च, गतिरेवं द्विभेदिनो ॥१२३

संस्थानं पञ्चधा तत्र, परिमण्डलमादिमम् ।
वृत्तं त्र्यस्रं चतुरस्र- मायतं चैव कीर्तितम् ॥१२४॥
पञ्चधैवं च भेदः स्यात् , खण्डश्च प्रतरस्तथा ।
चूर्णतोऽनुतटिका चा- त्करिका तत्र पञ्चमः १२५
वर्णोऽप्येवं स चैव स्यात्, कृष्णा नीलश्चरोहितः ।
पीतःशुक्लश्च गन्धश्च,सुरभिश्चासुरभिर्द्विधा ॥१२६॥

तिक्तश्च कटुकश्चैव, कषायश्चाम्लकस्तथा ।
मधुरश्चेति विज्ञेयो, रसः पञ्चविधः खलु ॥१२७॥
स्पर्शा अष्ट ते चैवं, कर्कशश्च मृदुर्गुरुः ।
लघुरेवं च शीतोष्णौ, स्निग्धरूक्षा तथैव च॥१२८॥

अगुरुलघुराख्यात- एकाकारो बुधेश्वरैः ।
शब्दाख्यः परिणामस्तु, भाव्यतेऽथ विपश्चिमः१२९
स द्विधा वा चतुर्धा च, द्विधा तत्र विभज्यते ।
शुभाशुभतया यद्वा, वैस्रसिकः प्रयोगजः १३०॥

ततश्च विततश्चैव, घनश्च शुषिरस्तथा ।
सङ्घर्षश्चाथ भाषा च स्यात् षोढेति प्रयोगजः १३१
चतुर्भेदाश्च तत्र स्यु- र्विमुच्यान्तिमयुग्मकम् ।
पुद्गलानां परिणामः, सङ्क्षेपादित्युदाहृताः १३२
एवं छायातपोद्योता- दयोऽप्यागमवेदिभिः ।
पुद्गलानां परिणाम- विशेषाः परिकीर्त्तिताः ॥ १३३
अथ निरूप्यते कालो, वर्त्तनालक्षणः स च ।
परिणामा नव प्राणा- वर्त्तना त्वभिधीयते ॥१३४॥
सार्द्धद्वीपद्वयाम्भोधि- र्वृतमानः स कीर्त्ततः ।
एक एवास्त्ययं कालो- वर्त्तमानः स वास्तवः १३५
कल्प्यन्ते व्यवहारार्थं, पुनरावलिकादयः ।
समयानामसङ्ख्याना- मेका साऽभिहिता बुधैः १३६
समयस्त्वविभाज्योऽति- सूक्ष्मः कालः समीरितः ।
द्रव्यपर्यायरूपो वा, सोऽभिरूपैः प्रकीर्त्तितः ॥ ३७ ॥

ताः संख्येया भवेदेक- उच्छवासश्च बलीयसः ।
ताभ्यां द्वाभ्यां भवेत्प्राणः, स्तोकः स्यात्तैश्च सप्तभिः
तावद्भिस्तैर्लवः प्रोक्तः, सार्धाष्टात्रिंशता च तैः ।
नालिकैका भवेद् द्वाभ्यां, ताभ्यां मुहूर्त्त ईरितः १३९
त्रिंशता तैरहोरात्र- एवमग्रेऽपि विस्तरः ।
एवं निरूपितं द्रव्यं, पर्यायोऽथो निरुच्यते ॥ १४० ॥

स द्वेधा सहभाव्याद्यः, क्रमभावी द्वितीयकः ।
संज्ञाविशेषतश्चेमौ, गुणः पर्याय इति क्रमात् १४१
तत्रास्तित्वं च वस्तुत्वं, द्रव्यत्वं च प्रमेयता ।
तथागुरुलघुत्वं च, प्रदेशत्वं तथैव च ॥ १४२ ॥
ज्ञानं च दर्शनं सौख्यं, वीर्यस्पर्शौ रसस्तथा ।
गन्धवर्णौ तथा ज्ञेयौ, गतिहेतुत्वकं तथा ॥ १४३ ॥
स्थित्यवगाहहेतुत्वं, वर्तनाहेतुता तथा ।
चेतनत्वाचेतनत्वे, मूर्त्तत्वामूर्त्तते इति ॥ १४४ ॥

विज्ञेयाः षट् च सामान्या-स्तत्रास्तित्वादयो गुणाः
विशेषा द्वादश प्रोक्ता- बुधैर्ज्ञानादिका गुणाः १४५

सामान्याश्च विशेषाश्च, चेतनत्वादयो मताः ।
पर्यायश्च द्विधा द्रव्य- गुणपर्यायभेदतः ॥ १४६ ॥

मनुष्यत्वादिराद्यः स्याद्- नीलादिर्द्वितीयो मतः
एवमन्यप्रकारश्च, पर्यायाणां भिदंमता ॥१४७॥

जयति श्रीजिनवीरो- यच्छिष्येण सुधर्मणा ।
प्रत्यष्ठापि प्रभावाढ्यो- गच्छो निर्ग्रन्थनामकः १४८

विबुधैर्विहितावासो- मध्यस्थभावभावितः ।
अनुत्तरस्तपोगच्छो- महामेरूपमस्तमोऽस्ति यः

निर्ग्रन्थगच्छ एवायं; जगच्चन्द्रप्रभोरनु ।
तपोगच्छाख्या लोके, बभूव सुप्रसिद्धिभाक् १५०

आचार्या नेमिसूरीश- स्तद्गच्छाम्भोधिचन्द्रमाः
सर्वशास्त्रस्य यो वेत्ता, जेता यो सर्ववादिनाम् १५१

यत्पादाम्भोजभक्त्यैव, चरणस्थैर्यमाप्नवम् ॥
दर्शनज्ञानदाता मे, जयत्ययमनुत्तरः ॥ १५२ ॥
तत्पादाब्जप्रभावेण, प्राज्ञवाचोऽनुस्मृत्य च ।
वाचकोदयशिष्येण, नन्दनाख्येन भिक्षुणा ॥१५३॥
पदार्थकथनं किञ्चित्, कृतं बालसुबोधकृत् ।
परमार्थपरैः प्राज्ञैः, शोध्यं तच्च सुचेतसा ॥१५४॥

संवत्सरे शरहयाङ्कविधुप्रमाण-
आषाढमाससितपक्षदिने द्वितीये ।
श्रीभाजि राजनगरे, नगरप्रधाने
मुक्तावलेर्विरचनग्रथनं प्रपूर्णम् ॥ १५५ ॥

जैनमुक्तावलि कृत्वा, सुकृतं यन्मयार्जितम् ।
सुखीभवतु लोकोऽयं, तेन पुण्येन हेतुना ॥ १५६

॥ इति श्री जैनमुक्तावलिः ॥

इति श्रीचरमतीर्थङ्करभगवन्महावीरप्रभुपट्टधरश्रीसुधर्मस्वामिप्रतिष्ठापि-
तनिर्ग्रन्थगच्छापराभिधानश्रीतपोगच्छापूर्वोदयाचलसहस्रकिरण-
श्रीमदर्हदुपदिष्टनिर्वृत्तिमार्गादर्शसविधिश्रीभगवत्यादिमहायो-
गोद्वहनपूर्वकश्रीगोतमस्वामिप्रमुखमहापुरुषसमाराधितसू-
रिमन्त्रसमाराधनविद्यापीठादिप्रस्थानपञ्चकसमाराधन-
समवाप्तसूरिपदश्रीशत्रुञ्जयप्रभृतिमहातीर्थसंरक्षणस
मुद्धारणप्रवणसंविग्नशाखीयभट्टारकाचार्यश्री-
विजयनेमिसूरिचरणाम्बुजमधुकरसिद्धा-
न्तवाचस्पतिन्यायविशारदमहोपाध्यायो-
दयविजयगणिशिष्यमुनिनन्दनवि-
जयविरचिता जैनमुक्तावलिः॥

। अर्हम् ।

॥ श्रीगौतमस्वामिने नमः ॥

विशुद्धचारित्रचूडामणि प्रौढप्रभावशालि तपोगच्छाचार्यभट्टारकमद्‌गुरुश्रीमद्विजयनेमिसूरिभगवद्‌भ्यो नमः

# ॥ श्रीसूरिस्तवशतकम् ॥

प्रणेता-

## ॥ मुनि नन्दनविजयः ॥

श्री 'जैनएडवोकेट' प्री प्रेसमां शा: चिमनलाल गोकलदासे छापो, घीकांटावाडी अमदावाद.

वीर सं, २४४९ विक्रम सं १९७९

आवृत्ति १ ली अमूल्यम् प्रत ५००

राजनगर(अमदावाद) वास्तव्य प्राग्वाटवणिग्वंशावतंसधर्मकर्म-
कर्मठश्रेष्ठिप्रवर **मनसुखभाइ सुत माणेकलालभाइ**
श्रेष्ठिप्रवरेण ग्रन्थोऽय राजनगर (अमदावाद
घीकांटा शेठ जेशंगभाइनी वाडी अन्तर्गत )
जैनएडवोकेट प्रीन्टींग प्रेस इत्याख्ये मुद्रणालये शा चीमनलाल
गोकलदासद्वारा सम्मुद्र्य प्रकाशितः,

॥ अर्हम् ॥

॥ श्रीपरमात्मने नमः ॥

॥ श्रीगौतमस्वामिने नमः ॥

॥ आचार्यश्रीविजयनेमिसूरिभगवद्भ्यो नमः ॥

# ॥ श्रीसूरिस्तवशतकम् ॥

प्रणम्य स्तम्भनाधीशं, स्तम्भतीर्थावतंसकम् ।
श्रीपार्श्वं सर्वसिद्धीनां, समागत्येकसाधनम् ॥ १ ॥

प्रणम्य श्रीमहावीरं, गणभृद्गौतमं प्रभुम् ।
त्रैलोक्यवन्दनीयांश्च, लोकेषु सर्वयोगिनः ॥ २ ॥

धन्यानां भव्यजीवाना-मवतंसन्त्यहर्निशम् ।
जगदुद्धारणैकस्य, यस्य पादनखार्चिषः ॥ ३ ॥

जातिर्यस्योत्तमा लोके, कुलं सर्वजनाधिकम् ।
जगद्विभूषणं रूपं, वीर्यं भुवनविश्रुतम् ॥ ४ ॥

श्रुतं पूर्वभवाभ्यस्तं, विस्फुरत्यधिकं सदा ।
यस्यैश्वर्यं समैश्वर्यं, सौभाग्यं जगदद्भुतम् ॥ ५ ॥

तं सर्वोत्कृष्टमद्वीर्यं, सद्गुरुं शिवदायकम् ।
दर्शनज्ञानचारित्र—समृध्ध्युत्कर्षशालिनम् ॥ ६ ॥

संयमश्रेणिमध्यस्थं योगसाम्राज्यशोभिनम् ।
आचार्यं नेमिसूरीशं, भक्त्या स्तवीम्युदारया ॥७॥

जल्पन् गुणानसद्भूता—नन्यं स्तौति जनं जनः ।
सतोऽपि तांस्तु ते वक्तु—मक्षमोऽहं कथं स्तुवे ॥८॥

बुधैरप्यपरिज्ञेय—गुणं त्वां स्तोतुमीश्वरः ।
कःस्यात्तथाप्यहं स्तौमि, व्युल्लसद्बालचापलः॥ ९ ॥

किञ्चाज्ञतामवज्ञाय, निजस्य त्वां स्तवीम्यहम् ।
यन्मां वाचालयत्येषा, त्वयि भक्तिरवारणा॥ १० ॥

नायुक्तत्वं गमिष्यामि, स्तुवंस्त्वामल्पधीरपि ।
अव्यक्ता अपि बालानां, युक्ता एव गुरौ गिरः॥११॥

तवानुभाव एवायं, समस्तोऽपि सुनिश्चितम् ।
तव प्रसादविख्याताः, के वयं परमार्थतः ॥ १२ ॥

दृष्टमात्रैश्च त्वत्पादै—र्जन्मान्तरकृतान्यपि ।
म्लायन्त्येनांसि पद्मानि, तरसेन्दुकरैरिव ॥ १३ ॥

ज्ञानध्यानतपोदग्धां—हसामेव भवान्तरे ।
उदेति भव्यलोकानां, भक्तिस्त्वय्यत्र योगिनि ॥ १४ ॥

हीनसत्त्वसमाक्रान्ताः, पापकर्मोदयाश्च ये ।
त एव पादसेवां ते, न जानन्ति प्रमादिनः ॥ १५ ॥

गाम्भीर्येण महाम्भोधिं, सहस्रांशुं तेजसा ।
धैर्येण मन्दरशृङ्गं, त्वं जयस्यतिविक्रमः ॥ १६ ॥

ये सर्वेऽपि तपोब्रह्म—सत्यसत्त्वादयो गुणाः ।
त्वय्येव ते वसन्त्युच्चै—र्विमुच्य विष्टपत्रयम् ॥ १७ ॥

इदं च नाद्भुतं नाथ, विश्वकल्याणकारक ।
समुद्रमेव गच्छन्ति, मणयः सरितो न हि ॥ १७ ॥

महाघोरभवाटव्या—मटतां भव्यदेहिनाम् ।
त्वमेवातिप्रयत्नेन, शुद्धमार्गोपदेशकः ॥ १९ ॥

त्वं चाविरतिजम्बाल—जालसंक्षालनक्षमः ।
बहूनां भव्यसत्त्वानां संसारोद्वेगशालिनाम्, ॥ २० ॥

पापपुञ्जोत्पादितश्च, तावत्तापोऽत्र देहिनाम् ।
यावत्तेषां न नाथ त्वं, सदानन्दो हृदि स्थितः ॥२१॥

प्रहताशेषसंसार—विस्तारो मुनिशेखर ।
घोरसंसारकान्तार—सार्थवाहस्त्वमेव च ॥ २२ ॥

नाथ त्वां चोररीकृत्य शङ्कारहितचेतसः ।
लभन्ते भूरि कल्याणं, निर्विकारत्वमागताः ॥२३॥

त्वं हि दीक्षां समादाय, निर्मलीकृतमानसः ।
सन्तोषसेवितो धन्यो-जातो धन्यावतंसकः ॥२४॥

सर्वशास्त्रेषु नैपुण्य—मादधत्त्वं महोदयः ।
गुरूणां पूज्यपादानां, भक्तिप्रवणतान्वितः ॥ २५ ॥

त्वमेव चाधुना नाथ, संसारे सुखकामिभिः ।
आदेयोऽसि प्रयत्नेना—शेषसम्पद्विधायकः ॥२६॥

निपतन्तो महाघोरे, सत्त्वा नरककूपके ।
अहिंसाहस्तदानेन, त्वया नाथ समुध्धृताः ॥ २७ ॥

मैत्र्यादिभिश्चतुर्भेदं, यच्चाज्ञादिचतुर्विधम् ।
ध्यानं तत्सर्वदा नाथा—वस्थितं चेतसि तव ॥२८ ॥

अष्टाङ्गयोगकौशल्य—मष्टसिद्धिप्रवीणता ।
अष्टाङ्गयोगदृष्टेश्च, नैपुण्यं ते महाद्भुतम् ॥ २९ ॥

एकादशाङ्गविज्ञत्वं, द्वादशोपाङ्गवेदनम् ।
छेदसूत्रेषु दक्षत्वं, कस्य दृष्टं त्वया विना ॥ ३० ॥

पूर्वाचार्यक्रमायात—शुद्धाचारनिषेवकः ।
सामाचारीसमायुक्तः, समाधिस्थानसंस्थितः ॥३१॥

द्वादशभावनोद्युक्तः, सक्लेशदशकोज्झितः ।
अकल्प्यषकटनिर्मुक्तो--रतः संवेगसागरे ॥ ३२ ॥

बाह्याभ्यन्तरग्रन्थ--त्यागी निर्ग्रन्थपुङ्गवः ।
प्रभावकश्चनिस्तन्द्रः, षट्सु कायेषु यत्नवान्॥ ३३ ॥

प्रज्ञप्त्यादिमहायोगो-द्वहनं प्रविधाय वै ।
समाराध्य महामन्त्रं, सूरिमन्त्रमनुत्तरम् ॥ ३४ ॥

सुधर्मस्वामिनः पट्ट—पारम्पर्यसमागतम् ।
प्राप्तवांस्त्वं पदं सूरेः, सार्वसंघशिरोमणिः ॥ ३५ ॥

तथाभूः सर्वविद्वद्भिः, सेवितस्य सदा मुदा ।
निग्रन्थप्रथमाख्यस्य, तपोगच्छस्य नायकः ॥ ३६ ॥

न्यायशास्त्रेषु सम्पूर्णाः, केचित्सिद्धान्तसागराः ।
केचिद्व्याकरणाभिज्ञाः, केचित् शास्त्रार्थकोविदाः॥

केचिद् ग्लानादिसाधूनां, वैयावृत्त्यादितत्पराः ।
योगोद्वाहिनः शुद्धा-चारशीलसमन्विताः ॥ ३८ ॥

जिनाज्ञां पालयन्तश्च, त्वदाज्ञानिरताः खलु ।
तवैवं शिष्यसङ्घाताः, प्रसिद्धा एव भूतले ॥ ३९ ॥

भगवन् करुणासिन्धो शुभलेश्य सुयोगभृत् ।
विगतस्पृह ते नाथ, कथं पुण्यं प्रवर्णये ॥ ४० ॥

दुर्भिक्षसमये नाथ, भूरिधर्मोपदेशतः ।
अनेकद्रव्यलक्षाणां, श्रीमतां त्याजनेन वै ॥ ४१ ॥

पशूनां मनुजानां च, बहूनामभयार्पणम् ।
कारयामासिषे यत्त्वं, तज्ज्ञातं कस्य नो भवेत् ।४३॥

ज्ञानार्थिनां तदर्थाय, ज्ञानशाला व्यधापयः ।
धर्मक्रियापराणां च, श्रावकाणां कृते पुनः ॥ ४३ ॥

उपदेशामृताच्चैत्य—पौषधालयकान्यपि ।
बहूनि श्रेष्ठिसवेभ्यो—नाथत्वं निरमीमपः ॥ ४४ ॥

शत्रुञ्जयमहातीर्थ—संरक्षणतत्परः ।
चैत्योद्धाराण्यनेकानि, चारूणि त्वं व्यधापयः ॥ ४५ ॥

मरुदेशे च ग्रामे तु, कर्पटहेटकाभिधे ।
स्वयम्भूपार्श्वप्रासादे, दर्शनाद्धर्षकारिणि ॥ ४६ ॥

समस्ताशातना घोरा—दूरीकृत्य प्रयत्नतः ।
महासंकटकालेऽपि, जीवितमप्युपेक्ष्य च ॥ ४७ ॥

स्वयम्भूपार्श्वनाथस्य, शान्तिनाथस्य च प्रभोः ।
अन्येषामपि तीर्थेशां, बिम्बानां जन्मनाशिनाम् ॥ ४८ ॥

समागते शुभे घस्रे, महोत्सवविभूषिते ।
प्रतिष्ठाप्य महामन्त्र—स्तदुद्धारस्त्वया कृतः ॥ ४९ ॥

मेदपाटे महादेशे, ये नरा निर्मलाशयाः ।
शौर्यवन्तोऽतिभद्राश्च, राजशासनतत्पराः ॥ ५० ॥

परन्तु भद्रकत्वात्ते, कुगुरुपाशपाशिताः ।
सद्गुरोश्च वियोगेन, धर्मयोगवियोजिताः ॥ ५१ ॥

तेषां सर्वाङ्गिनां नाथ, धर्मबोधनहेतवे ।
अनेकविद्वत्साधूनां, मण्डलालंकृतःप्रभुः ॥ ५२ ॥

पवित्रीकृत्य पादाभ्यां, मेदपाटस्य मेदिनीम् ।
केवलधर्मबुद्ध्यैव, गहनां विकटामपि ॥ ५३ ॥

हितया प्रियया चैवा—म्भोदगम्भीरया गिरा ।
शुद्धधर्मविभासिन्या, व्यस्तदोषसमाजया ॥ ५४ ॥

तान् सर्वानपि सद्धर्मे, वीतरागप्रकाशिते ।
अस्थापयस्त्वमानन्द—श्रद्धानिर्मलमानसान् ॥ ५५ ॥

मरुदेशे महाराज, त्वयानेके जनव्रजाः ।
धर्मे स्थिरत्वमानीता—मूर्तिमन्तव्यनान्विते ५६ ॥

अन्येष्वपि च देशेषु, विहारक्रमतः खलु ।
बोधिता बोधदानेन, त्वया मांसाशिनोऽप्यति ॥ ५७ ॥

विदुषोऽपि प्रभूतांस्त्वं, धर्मकर्मपराङ्मुखान् ।
योग्यसदुपदेशेन, धर्मकर्मस्वयोजयः ॥ ५८ ॥

एवं सत्यस्वरूपं ते, न जानन्त्यल्पबुद्धयः ।
मातङ्गा इव शार्दूल—विक्रमं लेशमात्रकम् ॥ ५९ ॥

जिनेशाज्ञाबहिर्भूता, सर्वसङ्घबहिष्कृताः ।
चाण्डाला इवास्पृश्या—येकेचिन् मार्गदूषकाः ॥ ६० ॥

ते तु त्वन्नाममात्रस्य, श्रुत्यैव ज्वरपीडिताः ।
किं श्रुत्वा गर्जनां सैंहीं, शृगालाः स्वास्थ्यमासते ६१॥

अदृष्टव्याननना ये च, देवद्रव्यादिनाशकाः ।
ते सर्वे त्वत्प्रतापेन, ग्लायन्ति पेचका इव ॥ ६२ ॥

जिनेशाज्ञां समुलङ्घ्य, योगोद्वहनमन्तरा ।
सन्ति ये पण्डितम्मन्याः, सूरित्वाडम्बरान्विताः ६३॥

ते वराकास्त्वधोवीर्या—धैर्यसत्त्वविवर्जिताः ।
निस्तेजांसि निजास्यानि, त्वदग्रेऽधः प्रकुर्वते ॥ ६४ ॥

तथाप्यत्र किमाश्चर्यं, लोकसिद्धमिदं हि यत् ।
प्रदीप्ते भुवि मार्तण्डे, खद्योता हततेजसः ॥ ६५ ॥

त्रिकालाबाधितामाज्ञां, सर्वज्ञस्य जिनेशितुः ।
सम्यक् प्रपालयन्नाथ, त्वमेवास्यधुना भुवि ॥ ६५ ॥

ये श्रेष्ठिकुलसञ्जाता—द्रव्यकोटीविभूषिताः ।
तेऽपि त्वां नाथ नाथेति, ब्रुवाणाः पर्युपासते ॥ ६६ ॥

देशाधीश्वरमान्या ये, देशसाम्राज्यशालिनः ।
तेऽपि त्वन्मीलनानन्दं, वाञ्छन्ति त्वरयान्वहम् ॥६७॥

कलाकलापविज्ञा ये, सर्वशास्त्रविशारदाः ।
ते सर्वेऽप्यात्मभक्तया ते, किङ्करत्वमुपागताः ॥ ६८ ॥

मेदपाटनरेशोऽपि, यस्त्वां स्तवीत्यहर्निशम् ।
तत्त्वत्पुण्यस्य साम्राज्यं, के न जानन्ति सद्धियः ॥ ६९॥

सहस्रांशुरिव स्वाभां, चन्द्रमाश्चन्द्रिका इव ।
क्षणमप्यात्मनस्त्वं नु, न मुञ्चस्यप्रमत्तताम् ॥ ७० ॥

त एव कृतिनो लोके, त एवाभ्युदयान्विताः ।
त एव भवकान्तारो—ल्लङ्घने सन्ति पण्डिताः॥ ७१ ॥

तव पञ्चविधाचार—व्यवहारव्रतशालिनः ।
नाथ ये पादपद्मस्य, सेवनां कुर्वतेतराम् ॥ ७१ ॥

समस्तमुत्तमं नाथ, वर्त्तते तव सुन्दरम् ।
सद्बुद्धिलेशहीनोऽहं, तत्र किंवर्णनक्षमः ॥ ७३ ॥

तथापि भक्तिरागेण, पूज्ययोस्तव पादयोः ।
प्रेरितेन स्तुतं किञ्चि—द्भिक्षुणा बालबुद्धिना ॥ ७४ ॥

धन्यः सौराष्ट्रदेशः स—धन्या मधुपुरी पुरी ।
या त्वया जन्मना नाथ—बन्धुरा पावनीकृता ॥७५॥

लक्ष्मीचन्द्रः पिता धन्यः, धर्मकार्येषु कोविदः ।
येन त्वं बाल्यतो धर्म—संस्कारैः संस्कृतोऽन्वहम् ॥७६॥

धन्या माता च दीपाली, सुशीला रत्नकुक्षिणी ।
या हि सौभाग्यसाम्राज्य—निधिं पुत्रमजीजनत् ॥७७॥

धन्यस्त्वं नाथ नाथानां, तत्कुलाम्बुनिधौ विधुः ।
यस्त्वं विज्ञाततत्त्वोऽभूः, प्राप्य सर्वज्ञशासनम् ॥ ७८ ॥

अधन्योऽप्यधुना धन्यो—जातोऽहं त्वां स्तुवन् प्रभो ।
धन्या एव हि नाथ त्वां, स्तुवन्ति विमलाशयाः ॥७९ ॥

आजन्मान्यो न नाथो मे, श्रीमन्तं त्वां विना यतः ।
अहं सद्दर्शनज्ञान—चारित्रस्थैर्यमापितः ॥ ८० ॥

चिन्तारत्नं न वाञ्छामि, नैव च चक्रवर्तिताम् ।
नैव राज्यं न चेन्द्रत्वं, नैवान्यच्चास्त्यतिप्रियम् ॥ ८१

किन्त्वेका नाथ ते पादा—म्भोजयोः सेवनानघा ।
सदास्त्वत्यभिलाषा मे, वर्धते सुतरां सदा ॥ ८२ ॥

भवादृशेषु नाथेषु, यतः प्राप्तेषु मादृशाम् ।
मज्जतां भवपाथोधौ, क्रियाज्ञानप्रमादिनाम् ॥ ८३ ॥

अनन्तानन्दपूर्णस्य, मोक्षस्य कारणं परम् ।
जैनेन्द्रशासने सम्यक्—श्रद्धान जायते भृशम् ॥८४॥

ततः प्रपञ्चं विज्ञाय, संसारस्य सुदुस्तरम् ।
महामोहस्य विस्तारं, सर्वव्यसनकारणम् ॥ ८५ ॥

ज्ञाततत्त्वा नरा भूत्वा, श्रद्धाक्षालितचेतसः ।
जिनाज्ञां पालयित्वा च, पारम्पर्येण मोक्षगाः ॥ ८६ ॥

सेवा तिष्ठतु ते नाथ, दर्शनं पुण्यकारकम् ।
केषां सम्पत्तये न स्या—दीक्षणं चाषपक्षिणः ॥ ८७ ॥

सद्भक्त्या भजताजस्रं, यूयं भव्याः कृतादराः ।
आचार्यं नेमिसूरीशं, यदि भाग्यभरालसाः ॥ ८८ ॥

ज्ञानप्रकाशसूर्याय—ज्ञानध्वांतविनाशिने ।
करुणानां निधानाय, नमः श्रीनेमिसूरये ॥ ८९ ॥

विबुधैः कृतसेवाय, महामेरूपमाय च ।
माध्यस्थ्यशालिने तस्मै, नमः श्रीनेमिसूरये ॥ ९० ॥

निर्मलीमसचित्ताय, रागसन्तापहारिणे ।
विश्वोपकारदक्षाय, नमः श्रीनेमिसूरये ॥ ९१ ॥

शौचसन्तोषपूर्णाय, भुवनाह्लादकारिणे ।
गाम्भीर्येण समुद्राय, नमः श्रीनेमिसूरये ॥ ९२ ॥

त्रैलोक्यवन्दनीयाय, भोगतृष्णाविघातिने ।
महानन्दनिवासाय, नमः श्रीनेमिसूरये ॥ ९३ ॥

कल्पद्रुमाय काम्यार्थे, स्तुत्याय तत्त्ववेदिभिः ।
रम्याय शुद्धयोगेन, विख्याताय सदा भुवि ॥ ९४ ॥

जन्मव्यसननाशाय, यमिभिः सेविताङ्घ्रये ।
स्यत्सुधातुलवाचाय, शिवाय शिवदायिने ॥ ९५ ॥

वर्याराधनमासाय, मर्त्यानां मुकुटाय च ।
स्तुत्यपादाब्जयुग्माय, नमः श्रीनेमिसूरये ॥ ९६ ॥

स्तम्भतीर्थे महातीर्थे, अम्बावत्यपराभिधे ।
श्रीपार्श्वेशप्रसादेन, भूरिसौभाग्यपूरणे ॥ ९७ ॥

नवर्ष्यङ्कनिशानाथै—र्मिते संवत्सरे शुभे ।
मृगशीर्षे सिते पक्षे, सम्प्राप्ते दशमीदिने ॥ ९८ ॥

राजनगरमुख्येभ्यः पुरेभ्यो भक्तिशालिषु ।
श्रेष्ठिवर्गेष्वनेकेषु, मीलितेषु समुत्सवम् ॥ ९९ ॥

साधुसाध्व्यादिसङ्घाते, प्राप्ते संघे चतुर्विधे ।
महामहोत्सवे जाते—ऽनेकद्रव्यव्ययेन वै ॥ १०० ॥

महानिशीथमुख्येषु, सूत्रेषूक्तविधानतः ।
योगोपधानमालायाः, परिधापनवासरे ॥ १०१ ॥

मालायाश्च महामन्त्रं, विदधतो महौजसः ।
पूर्वंयुगप्रधानानां, स्मृतिं कारयतो विभोः ॥ १०२ ॥

नेमिसूरेः क्रमाम्भोज—शुद्धभक्त्यनुभावतः ।
वाचकोदयशिष्येण, नन्दनाख्येन भिक्षुणा ॥ १०३ ॥

विहितं स्तवनं शुद्ध—स्वात्मकल्याणहेतवे ।
आमेरु बोधिलाभार्थं, पठन्तु भव्यदेहिनः ॥ १०४ ॥

सद्गुरोः स्तवनं कृत्वा, नेमिसूरेर्विभोर्मया ।
समर्जितं सुपुण्यं यत्, तेन लोकोऽस्तु बोधिभाक् १०५

श्रीतीर्थंकर श्रीमहावीरप्रभुशासनोद्धरणधुरीणशुद्धसम्य
क्त्वविभूषित सकलजगदुद्धर्तुकामितादिपरमगुणसमू-
हसमन्वित शत्रुञ्जयरैवतादिमहातीर्थसंरक्षणसमु-
द्धरणप्रवणश्रीभगवत्यादिसकलयोगोद्वहन-
सूरिमन्त्रसमाराधनपूर्वकप्राप्तसूरिपदसं-
विग्नशाखीयतपोगच्छाचार्यभट्टारक
श्रीमद्विजयनेमिसूरिभगवच्चर-
णेन्दीवरमिलिन्दायमान-
सिद्धान्तवाचस्पति-
न्यायविशारदानुयोगाचार्यमहोपा-
ध्यायोदयविजयगणिशिष्य
मुनिनन्दनविजयविरचितं
" सूरिस्तवशतकं "
सम्पूर्णम् ॥